लक्ष्यं विश्वमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 6th Semester Examination, 2023

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

## SANADSE06T-SANSKRIT (DSE3/4)

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A
### (Marks: 20)

1. अधोलिखितयो ***एकः*** प्रश्नः समाधेयः। $10 \times 1 = 10$

(क) का खलु रीतिः ? काव्यनिर्माणे रीतेः भूमिका सविशदम् उल्लेखनीया।

(ख) शब्दगुणाः कतिविधाः ? तेषु गुणत्रयं सलक्षणं विशदीक्रियताम्।

2. अधोलिखितेषु प्रश्नेषु यथेच्छं ***पञ्च*** प्रश्नाः समाधेयाः। $2 \times 5 = 10$

(क) कानि खलु काव्याङ्गानि ?

(ख) अरोचकी इति पदस्य कोऽर्थः ?

(ग) कान्तिगुणस्य लक्षणं दीयताम्।

(घ) वामनकृतम् अलङ्कारसूचकं लक्षणद्वयं लिख्यताम्।

(ङ) काव्याङ्गरूपेण प्रकीर्णस्य स्वरूपम् उल्लेख्यम्।

(च) विद्या कतिविधा ?

(छ) प्रतिभायाः स्वरूपं उल्लेखनीयम्।

### SECTION-B
### (Marks: 30)

3. अधोलिखितयोः ***एकः*** प्रश्नः समाधेयः। $10 \times 1 = 10$

(क) भट्टिकाव्यस्य द्वितीयसर्गमवलम्ब्य शरदः वर्णना सविस्तारं लेखनीया।

(ख) दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्
हस्तामर्ष इवान्धानां भवेद् व्याकरणादृते ॥
— उक्तिरियं सविशदं व्याख्येया।

DINABANDHU MAHAVIDYALAYA Estd.-1947 CENTRAL LIBRARY

4. अधोदत्तेषु यथेच्छं ***द्वयं*** व्याख्येयम्। 5×2 = 10

(क) दत्तावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः।
आकर्णयन्नुत्सुकहंसनादान्
लक्ष्ये समाधिं न दधे मृगावित्॥

(ख) निशातुषारैर्नयनाम्बुकल्पैः
पत्रान्तपर्यागलदच्छविन्दुः।
उपारूरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर्दिनादौ॥

(ग) वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च निलीनभृङ्गैः।
परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवादरेण॥

(घ) सितारविन्दप्रचयेषु लीनाः
संसक्तफेनेषु च सैकतेषु।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः॥

5. अधोनिर्दिष्टं ***विषयद्वयमाश्रित्य*** टीका लेख्या। 5×2 = 10

काकुत्स्थः, मैथिली, विश्वामित्रः, बलिः।

——×——